Savitrikrita Yama Stuti 2

# सावित्रिकृता यमस्तुतिः २

## Document Information

Text title : Savitrikrita Yama Stuti 2

File name : sAvitrikRRitAyamastutiH.itx

Category : deities_misc, matsyapurANa, stuti

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : matsyapurANa | adhyAya 213/1-11||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 27, 2024

*sanskritdocuments.org*

# सावित्रिकृता यमस्तुतिः २

सावित्र्युवाच ।
धर्माधर्मविधानज्ञ सर्वधर्मप्रवर्तक ।
त्वमेव जगतो नाथः प्रजासंयमनो यमः ॥ १॥

कर्मणामनुरूपेण यस्माद्यमयसे प्रजाः ।
तस्माद्वै प्रोच्यसे देव यम इत्येव नामतः ॥ २॥

धर्मेणेमाः प्रजाः सर्वा यस्माद्र ञ्जयसे प्रभो ।
तस्मात्ते धर्मराजेति नाम सद्भिर्निगद्यते ॥ ३॥

सुकृतं दुष्कृतं चोभे पुरोधाय यदा जनाः ।
त्वत्सकाशं मृता यान्ति तस्मात्त्वं मृत्युरुच्यसे ॥ ४॥

कालं कलार्धं कलयन्सर्वेषां त्वं हि तिष्ठसि ।
तस्मात्कालेति ते नाम प्रोच्यते तत्त्वदर्शिभिः ॥ ५॥

सर्वेषामेव भूतानां यस्मादन्तकरो महान् ।
तस्मात्त्वमन्तकः प्रोक्तः सर्वदेवैर्महाद्युते ॥ ६॥

विवस्वतस्त्वं तनयः प्रथमः परिकीर्तितः ।
तस्माद्वैवस्वतो नाम्ना सर्वलोकेषु कथ्यसे ॥ ७॥

आयुष्ये कर्मणि क्षीणे गृह्णासि प्रसभं जनम् ।
तदा त्वं कथ्यसे लोके सर्वप्राणहरेति वै ॥ ८॥

तव प्रसादाद्देवेश त्रयीधर्मो न नश्यति ।
तव प्रसादाद्देवेश धर्मे तिष्ठन्ति जन्तवः ।
तव प्रसादाद्देवेश सङ्करो न प्रजायते ॥ ९॥

सतां सदा गतिर्देव त्वमेव परिकीर्तितः ।
जगतोऽस्य जगन्नाथ मर्यादापरिपालकः ॥ १०॥

पाहि मां त्रिदशश्रेष्ठ दुःखितां शरणागताम् ।
पितरौ च तथैवास्य राजपुत्रस्य दुःखितौ ॥ ११॥

इति मत्स्यपुराणे त्रयोदशाधिकद्विशततमाध्यायान्तर्गता
सावित्रिकृता यमस्तुतिः समाप्ता ।

मत्स्यपुराण । अध्याय २१३/१-११॥

matsyapurANa . adhyAya 213/1-11..

Proofread by PSA Easwaran

*Savitrikrita Yama Stuti 2*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*